# Sadananda Upanishad

# સદાનન્દોપનિષત્

## Document Information

Text title : sadAnandopaniShat

File name : sadAnandopaniShat.itx

Category : upanishhat, shiva, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# સદાનન્દોપનિષત્

તચ્છંયોરાવૃણીમહે-ઇતિ શાન્તિઃ
અથૈનં સદાનન્દઃ સંવર્તો જૈગીષવ્યશ્ચ નીલલોહિતં રુદ્રમુવાચ ।
ભગવન્ કિમપવર્ગં સાધયતીતિ । સ એતેભ્યો ભગવાન્ નીલલોહિતઃ
પ્રોવાચ । અન્તર્બહિર્ધારિતં પરમ્બ્રહ્માભિધેયં શામ્ભવં લિઙ્ગમ્,
આધારે દહરેઽવ્યક્તે સ્વર્ણસ્ફાટિકવૈદ્રુમમ્ । નિરન્તરાનુસન્ધાનાત્
તદન્તર્ધારણે વિદુઃ ॥

ચતુર્દલં દ્વાદશારં દ્વ્યશ્રમવ્યક્તકં શિવમ્ ।
દહરેઽઙ્ગુષ્ઠમાત્રં તમુમાકાન્તમહર્નિશમ્ ।
અનિરાકારમાત્માનં ધૃત્વા યાન્તિ પરં પદમ્ ॥

પરાત્ પરતરો બ્રહ્મા તત્પરાત્ પરતો હરિઃ ।
તત્પરાત્ પરતોઽધીશસ્તસ્માત્ સ્યાદુત્તરઃ શિવઃ ॥

જાતવેદસમવ્યક્તં વ્યક્તાવ્યક્તં પરં સદા ।
તમાત્મસ્થં યેઽનુપશ્યન્તિ ધીરાઃ ।
તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥

અન્તર્ધારણશક્તેન હ્યશક્તેન દ્વિજોત્તમાઃ ।
સન્ત્કૃત્ય ગુરુણા દત્તં શૈવં લિઙ્ગમુરઃસ્થલે ।
ધાર્યં વિપ્રેણ મુક્ત્યર્થે શિવતત્ત્વવિદો વિદુઃ ॥

યેનાચિરાત્સર્વપાપં વ્યપોહ્ય પરાત્પરં પુરુષમુપૈતિ વિદ્વાન્ ।

અસ્ય માત્રા અકારો બ્રહ્મરૂપ ઉકારો વિષ્ણુરૂપો મકારઃ કાલકાલઃ
અર્ધમાત્રા પરમશિવઃ ઓઙ્કારો લિઙ્ગમ્ ॥

યોઽસૌ સર્વેષુ વેદેષુ પઠ્યતે હ્યજ ઈશ્વરઃ ।
તસ્માત્તદ્ધારણાદેતલ્લિઙ્ગદેહમલૌકિકમ્ ।
મૃતેઽપિ તન્ન દહ્યેત બિલે ચૈતદ્વિનિક્ષિપેત ॥

ને કર્મણા ન પ્રજયા ધનેન ત્યાગેનૈકેઽમૃતત્વમાનશુઃ ॥

યો વા સ્વહસ્તાર્ચિતલિઙ્ગમેકં પરાત્પર ધારયતે નરો વા ।
તસ્યૈવ લભ્યઃ પરમેશ્વરોઽસૌ નિરઞ્જનં સામ્યમુપૈતિ દિવ્યમ્ ॥

શિવલિઙ્ગધરં વિપ્રં વિપન્નં ત ન દાહયેત્ ।
યદિ વા દાહયેત્તસ્ય બ્રહ્મહત્યા તદા ભવેત્ ॥

યદિદં લિઙ્ગં સકળં સકળનિષ્કળં નિષ્કલં ચ સ્થૂલં સૂક્ષ્મં
ચ તત્પરં સ્થૂલે સ્થૂલં સૂક્ષ્મે સૂક્ષ્મં કારણે તત્પરં ચ ॥

આત્માનભરણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાદેવ પાશં દહતિ માનવઃ ।
અન્તર્બહિશ્ચ તલ્લિઙ્ગં વિધત્તે યસ્તુ શાશ્વતમ્ ॥

અવિદ્યાઽઽવરણં ભિત્ત્વા બ્રહ્મણઃ સાયુજ્યં સલોકતામાપ્નોતિ । તદિદં
લિઙ્ગં પ્રીમ્ । તદિદં ૐ સત્યમ્ । યો વિદ્વાન્ બ્રહ્મચારી ગૃહી
વાનપ્રસ્થો યતિર્વા સદાનન્દોપનિષદં પઠતિ સોઽગ્નિપૂતો ભવતિ ।
સ સત્યપૂતો ભવતિ । સ્વર્ણસ્તેયાત્ પૂતો ભવતિ ।
બ્રહ્મહત્યાયાઃ પૂતો ભવતિ ।
સ સકલભોગભુક્ દેહં ત્યક્ત્વા શિવસાયુજ્યમેતિ । ઇત્યુપનિષત્ ॥

(શૈવ-ઉપનિષદઃ)

ઇતિ સદાનન્દોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Sadananda Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*